श्री ऋणहर्तृ गणेश स्तोत्रं

श्री ऋणहर्तृ गणेश स्तोत्रं

||अथ स्तोत्रं||

सृष्ट्यादौ ब्रह्मणा सम्यक्पूजितः फलसिद्धये |
सदैव पार्वतीपुत्रः ऋणनाशं करोतु मे ||1||

त्रिपुरस्य वधात्पूर्वं शंभुना सम्यगर्चितः |
सदैव पार्वतीपुत्रः ऋणनाशं करोतु मे ||2||

हिरण्यकशिप्वादीनां वधार्थे विष्णुनार्चितः |
सदैव पार्वतीपुत्रः ऋणनाशं करोतु मे ||3||

महिषस्य वधे देव्या गणनाथः प्रपूजितः |
सदैव पार्वतीपुत्रः ऋणनाशं करोतु मे ||4||

तारकस्य वधात्पूर्वं कुमारेण प्रपूजितः |
सदैव पार्वतीपुत्रः ऋणनाशं करोतु मे ||5||

भास्करेण गणेशो हि पूजितश्छविसिद्धये |
सदैव पार्वतीपुत्रः ऋणनाशं करोतु मे ||6||

शशिना कांतिवृद्ध्यर्थं पूजितो गणनायकः |
सदैव पार्वतीपुत्रः ऋणनाशं करोतु मे ||7||

पालनाय स्वतपसां विश्वामित्रेण पूजितः |
सदैव पार्वतीपुत्रः ऋणनाशं करोतु मे ||8||

इदं ऋणहरस्तोत्रं तीव्रदारिद्र्यनाशनं |
एकवारं पठेन्नित्यं वर्षमेकं समाहितः ||9||

दारिद्र्याद्दारुणान्मुक्तः कुबेरसंपदं व्रजेत् |
फडंतोऽयं महामंत्रः सार्थपंचदशाक्षरः ||10||

ॐ गणेश ऋणं छिंदि वरेण्यं हुं नमः फट् |
इमं मंत्रं पठेदंते ततश्च शुचिभावनः ||11||

एकविंशतिसंख्याभिः पुरश्चरणमीरितं |
सहस्रावर्तनात्सम्यक् षण्मासं प्रियतां व्रजेत् ||12||

बृहस्पतिसमो ज्ञाने धने धनपतिर्भवेत् |
अस्यैवायुतसंख्याभिः पुरश्चरणमीरितं ||13||

लक्षमावर्तनात्सम्यग्वांछितं फलमाप्नुयात् |
भूतप्रेतपिशाचानां नाशनं स्मृतिमात्रतः ||14 ||अथ प्रयोगः||

अस्य श्री ऋणहर्तृगणपतिस्तोत्र महामंत्रस्य | सदाशिव ऋषिः | अनुष्टुप् छंदः | श्रीऋणहर्तृगणपतिर्देवता | ग्लौं बीजं | गः शक्तिः | गं कीलकं | मम सकल ऋणनाशने जपे विनियोगः |

करन्यासः |
ॐ गणेश अंगुष्ठाभ्यां नमः |
ॐ ऋणं छिंदि तर्जनीभ्यां नमः |
ॐ वरेण्यं मध्यमाभ्यां नमः |
ॐ हुं अनामिकाभ्यां नमः |
ॐ नमः कनिष्ठिकाभ्यां नमः |
ॐ फट् करतलकरपृष्ठाभ्यां नमः |

षडंगन्यासः |
ॐ गणेश हृदयाय नमः |
ॐ ऋणं छिंदि शिरसे स्वाहा |
ॐ वरेण्यं शिखायै वषट् |
ॐ हुं कवचाय हुं |
ॐ नमः नेत्रत्रयाय वौषट् |
ॐ फट् अस्त्राय फट् |

ध्यानं –

सिंदूरवर्णं द्विभुजं गणेशं
लंबोदरं पद्मदळे निविष्टं |
ब्रह्मादिदेवैः परिसेव्यमानं
सिद्धैर्युतं तं प्रणमामि देवं| |

लमित्यादि पंचपूजा | |मंत्रः| |
ॐ गणेश ऋणं छिंदि वरेण्यं हुं नमः फट् |

इति श्रीकृष्णयामलतंत्रे उमामहेश्वरसंवादे श्री ऋणहर्तृ गणेश स्तोत्रं |